1.

॥ अथ नलोपाख्यानम् ॥

बृहदश्व उवाच ।

आसीद् राजा नलो नाम वीरसेनसुतो बली ।
उपपन्नो गुणैर् इष्टै रूपवान् अश्वकोविदः ॥१॥
5 अतिष्ठन् मनुजेन्द्राणां मूर्ध्नि देवपतिर् यथा ।
उपर्य् उपरि सर्वेषाम् आदित्य इव तेजसा ॥२॥
ब्रह्मण्यो वेदविच् छूरो निषधेषु महीपतिः ।
अक्षप्रियः सत्यवादी महान् अक्षौहिणीपतिः ॥३॥
ईप्सितो नरनारीणाम् उदारः संयतेन्द्रियः ।
10 रक्षिता धन्विनां श्रेष्ठः साक्षाद् इव मनुः स्वयम् ॥४॥
तथैवासीद् विदर्भेषु भीमो भीमपराक्रमः ।
शूरः सर्वगुणैर् युक्तः प्रजाकामः स चाप्रजः ॥५॥
स प्रजार्थे परं यत्नम् अकरोत् सुसमाहितः ।
तम् अभ्यगच्छद् ब्रह्मर्षिर् दमनो नाम भारत ॥६॥
15 तं स भीमः प्रजाकामस् तोषयामास धर्मवित् ।
महिष्या सह राजेन्द्र सत्कारेण सुवर्चसम् ॥७॥
तस्मै प्रसन्नो दमनः सभार्याय वरं ददौ ।

कन्यारत्नं कुमारांश् च त्रीन् उदारान् महायशाः ॥८॥
दमयन्तीं दमं दान्तं दमनं च सुवर्चसम् ।
उपपन्नान् गुणैः सर्वैर् भीमान् भीमपराक्रमान् ॥९॥
दमयन्ती तु रूपेण तेजसा यशसा श्रिया ।
5 सौभाग्येन च लोकेषु यशः प्राप सुमध्यमा ॥१०॥
अथ तां वयसि प्राप्ते दासीनां समलंकृतम् ।
शतं शतं सखीनां च पर्युपासच् छचीम् इव ॥११॥
तत्र स्म राजते भैमी सर्वाभरणभूषिता ।
सखीमध्ये ऽनवद्याङ्गी विद्युत् सौदामनी यथा ॥१२॥
10 अतीव रूपसंपन्ना श्रीर् इवायतलोचना ।
न देवेषु न यक्षेषु तादृग् रूपवती क्व चित् ॥१३॥
मानुषेष्व् अपि चान्येषु दृष्टपूर्वाथ वा श्रुता ।
चित्तप्रमाथिनी बाला देवानाम् अपि सुन्दरी ॥१४॥
नलश् च नरशार्दूलो लोकेष्व् अप्रतिमो भुवि ।
15 कन्दर्प इव रूपेण मूर्तिमान् अभवत् स्वयम् ॥१५॥
तस्याः समीपे तु नलं प्रशशंसुः कुतूहलात् ।
नैषधस्य समीपे तु दमयन्तीं पुनः पुनः ॥१६॥
तयोर् अदृष्टकामो ऽभूच् छृण्वतोः सततं गुणान् ।
अन्योन्यं प्रति कौन्तेय स व्यवर्धत हृच्छयः ॥१७॥
20 अशक्नुवन् नलः कामं तदा धारयितुं हृदा ।
अन्तःपुरसमीपस्थे वन आस्ते रहो गतः ॥१८॥
स ददर्श ततो हंसाञ् जातरूपपरिष्कृतान् ।
वने विचरतां तेषाम् एकं जग्राह पक्षिणम् ॥१९॥

ततो ऽन्तरिक्षगो वाचं व्याजहार नलं तदा ।
हन्तव्यो ऽस्मि न ते राजन् करिष्यामि तव प्रियम् ॥२०॥
दमयन्तीसकाशे त्वां कथयिष्यामि नैषध ।
यथा त्वद् अन्यं पुरुषं न सा मंस्यति कर्हि चित् ॥२१॥
5 एवम् उक्तस् ततो हंसम् उत्ससर्ज महीपतिः ।
ते तु हंसाः समुत्पत्य विदर्भान् अगमंस् ततः ॥२२॥
विदर्भनगरीं गत्वा दमयन्त्यास् तदान्तिके ।
निपेतुस् ते गरुत्मन्तः सा ददर्श च तान् गणान् ॥२३॥
सा तान् अद्भुतरूपान् वै दृष्ट्वा सखिगणावृता ।
10 हृष्टा ग्रहीतुं खगमांस् त्वरमाणोपचक्रमे ॥२४॥
अथ हंसा विससृपुः सर्वतः प्रमदावने ।
एकैकशस् तदा कन्यास् तान् हंसान् समुपाद्रवन् ॥२५॥
दमयन्ती तु यं हंसं समुपाधावद् अन्तिके ।
स मानुषीं गिरं कृत्वा दमयन्तीम् अथाब्रवीत् ॥२६॥
15 दमयन्ति नलो नाम निषधेषु महीपतिः ।
अश्विनोः सदृशो रूपे न समास् तस्य मानुषाः ॥२७॥
तस्य वै यदि भार्या त्वं भवेथा वरवर्णिनि ।
सफलं ते भवेज् जन्म रूपं चेदं सुमध्यमे ॥२८॥
वयं हि देवगन्धर्वमानुषोरगराक्षसान् ।
20 दृष्टवन्तो न चास्माभिर् दृष्टपूर्वस् तथाविधः ॥२९॥
त्वं चापि रत्नं नारीणां नरेषु च नलो वरः ।
विशिष्टाया विशिष्टेन संगमो गुणवान् भवेत् ॥३०॥
एवम् उक्ता तु हंसेन दमयन्ती विशां पते ।

अब्रवीत् तत्र तं हंसं त्वम् अप्य् एवं नले वद ॥३१॥
तथेत्य् उक्त्वाण्डजः कन्यां विदर्भस्य विशां पते ।
पुनर् आगम्य निषधान् नले सर्वं न्यवेदयत् ॥३२॥

॥ इति नलोपाख्याने प्रथमः सर्गः ॥१॥

बृहदश्व उवाच ।

दमयन्ती तु तच् छ्रुत्वा वचो हंसस्य भारत ।
ततः प्रभृति न स्वस्था नलं प्रति बभूव सा ॥१॥
ततश् चिन्तापरा दीना विवर्णवदना कृशा ।
बभूव दमयन्ती तु निःश्वासपरमा तदा ॥२॥
ऊर्ध्वदृष्टिर् ध्यानपरा बभूवोन्मत्तदर्शना ।
पाण्डुवर्णा क्षणेनाथ दुःखयाविष्टचेतना ॥३॥
न शय्यासनभोगेषु रतिं विन्दति कर्हि चित् ।
न नक्तं न दिवा शेते हा हेति रुदती पुनः ॥४॥
ततो विदर्भपतये दमयन्त्याः सखीजनः ।
न्यवेदयत् ताम् अस्वस्थां दमयन्तीं नरेश्वरे ॥५॥
तच् छ्रुत्वा नृपतिर् भीमो दमयन्तीसखीगणात् ।
चिन्तयामास तत् कार्यं सुमहत् स्वां सुतां प्रति ॥६॥
स समीक्ष्य महीपालः स्वां सुतां प्राप्तयौवनाम् ।
अपश्यद् आत्मना कार्यं दमयन्त्याः स्वयंवरम् ॥७॥
स संनिमन्त्रयामास महीपालान् विशां पतिः ।
अनुभूयताम् अयं वीराः स्वयंवर इति प्रभो ॥८॥

श्रुत्वा तु पार्थिवाः सर्वे दमयन्त्याः स्वयंवरम् ।
अभिजग्मुस् ततो भीमं राजानो भीमशासनात् ॥९॥
हस्त्यश्वरथघोषेण पूरयन्तो वसुंधराम् ।
विचित्रमाल्याभरणैर् बलैर् दृश्यैः स्वलंकृतैः ॥१०॥
तेषां भीमो महाबाहुः पार्थिवानां महात्मनाम् ।
यथार्हम् अकरोत् पूजां ते ऽवसंस् तत्र पूजिताः ॥११॥
एतस्मिन् एव काले तु सुराणाम् ऋषिसत्तमौ ।
अटमानौ महात्मानाव् इन्द्रलोकम् इतो गतौ ॥१२॥
नारदः पर्वतश् चैव महाप्राज्ञौ महाव्रतौ ।
देवराजस्य भवनं विविशाते सुपूजितौ ॥१३॥
ताव् अर्चयित्वा मघवा ततः कुशलम् अव्ययम् ।
पप्रच्छानामयं चापि तयोः सर्वगतं विभुः ॥१४॥

नारद उवाच ।

आवयोः कुशलं देव सर्वत्र गतम् ईश्वर ।
लोके च मघवन् कृत्स्ने नृपाः कुशलिनो विभो ॥१५॥

बृहदश्व उवाच ।

नारदस्य वचः श्रुत्वा पप्रच्छ वलवृत्रहा ।
धर्मज्ञाः पृथिवीपालास् त्यक्तजीवितयोधिनः ॥१६॥
शस्त्रेण निधनं काले ये गच्छन्त्य् अपराङ्मुखाः ।
अयं लोको ऽक्षयस् तेषां यथैव मम कामधुक् ॥१७॥
क्व नु ते क्षत्रियाः शूरा न हि पश्यामि तान् अहम् ।
आगच्छतो महीपालान् दयितान् अतिथीन् मम ॥१८॥

एवम् उक्तस् तु शक्रेण नारदः प्रत्यभाषत ।
शृणु मे मघवन् येन न दृश्यन्ते महीक्षितः ॥१९॥
विदर्भराज्ञो दुहिता दमयन्तीति विश्रुता ।
रूपेण समतिक्रान्ता पृथिव्यां सर्वयोषितः ॥२०॥
5 तस्याः स्वयंवरः शक्र भविता नचिराद् इव ।
तत्र गच्छन्ति राजानो राजपुत्राश् च सर्वशः ॥२१॥
तां रत्नभूतां लोकस्य प्रार्थयन्तो महीक्षितः ।
काङ्क्षन्ति स्म विशेषेण वलवृत्रनिषूदन ॥२२॥
एतस्मिन् कथ्यमाने तु लोकपालाश् च साग्निकाः ।
10 आजग्मुर् देवराजस्य समीपम् अमरोत्तमाः ॥२३॥
ततस् ते शुश्रुवुः सर्वे नारदस्य वचो महत् ।
श्रुत्वैव चाब्रुवन् हृष्टा गच्छामो वयम् अप् उत ॥२४॥
ततः सर्वे महाराज सगणाः सहवाहनाः ।
विदर्भान् अभिजग्मुस् ते यतः सर्वे महीक्षितः ॥२५॥
15 नलो ऽपि राजा कौन्तेय श्रुत्वा राज्ञां समागमम् ।
अभ्यगच्छद् अदीनात्मा दमयन्तीम् अनुव्रतः ॥२६॥
अथ देवाः पथि नलं ददृशुर् भूतले स्थितम् ।
साक्षाद् इव स्थितं मूर्त्या मन्मथं रूपसंपदा ॥२७॥
तं दृष्ट्वा लोकपालास् ते भ्राजमानं यथा रविम् ।
20 तस्थुर् विगतसंकल्पा विस्मिता रूपसंपदा ॥२८॥
ततो ऽन्तरिक्षे विष्टभ्य विमानानि दिवौकसः ।
अब्रुवन् नैषधं राजन् अवतीर्य नभस्तलात् ॥२९॥
भो भो नैषध राजेन्द्र नल सत्यव्रतो भवान् ।

अस्माकं कुरु साहाय्यं दूतो भव नरोत्तम ॥३०॥

॥ इति नलोपाख्याने द्वितीयः सर्गः ॥ २ ॥

बृहदश्व उवाच ।

तेभ्यः प्रतिज्ञाय नलः करिष्य इति भारत ।
5 अथैतान् परिपप्रच्छ कृताञ्जलिर् उपस्थितः ॥१॥
के वै भवन्तः कस् चासौ यस्याहं दूत ईप्सितः ।
किं च तद् वो मया कार्यं कथयध्वं यथातथम् ॥२॥
एवम् उक्ते नैषधेन मघवान् अभ्यभाषत ।
अमरान् वै निबोधास्मान् दमयन्त्यर्थम् आगतान् ॥३॥
10 अहम् इन्द्रो ऽयम् अग्निश् च तथैवायम् अपां पतिः ।
शरीरान्तकरो नॄणां यमो ऽयम् अपि पार्थिव ॥४॥
त्वं वै समागतान् अस्मान् दमयन्त्यै निवेदय ।
लोकपाला महेन्द्राद्याः समायान्ति दिदृक्षवः ॥५॥
प्राप्तुम् इच्छन्ति देवास् त्वां शक्रो ऽग्निर् वरुणो यमः ।
15 तेषाम् अन्यतमं देवं पतित्वे वरयस्व ह ॥६॥
एवम् उक्तः स शक्रेण नलः प्राञ्जलिर् अब्रवीत् ।
एकार्थं समुपेतं मां न प्रेषयितुम् अर्हथ ॥७॥
कथं नु जातसंकल्पः स्त्रियम् उत्सहते पुमान् ।
परार्थम् ईदृशं वक्तुं तत् क्षमन्तु महेश्वराः ॥८॥
20 देवा ऊचुः ।
करिष्य इति संश्रुत्य पूर्वम् अस्मासु नैषध ।